International Journal of Sanskrit Research 2019; 5(4): 364-366

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): **364-366**
© 2019 IJSR
www.anantaajournal.com
Received: 26-05-2019
Accepted: 29-06-2019

**डॉं. कृपाशङ्करशर्मा**
असि. प्रोफेसर,
साहित्यविभाग:,
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीरघुनाथकीर्तिपरिसर:,
देवप्रयाग:, उत्तराखण्ड,
भारत

**Corresponding Author:**
**डॉं. कृपाशङ्करशर्मा**
असि. प्रोफेसर,
साहित्यविभाग:,
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीरघुनाथकीर्तिपरिसर:,
देवप्रयाग:, उत्तराखण्ड,
भारत

# रत्नावलीनाटिकायां औचित्यविमर्श:

## डॉं. कृपाशङ्करशर्मा

**सारांश:**
प्रस्तुतेऽस्मिन् शोधपत्रे रत्नावलीनाटिकाया: पद्यानि स्वीकृत्य औचित्यचर्चा चर्चिता जाता। अस्यां चर्चायां अलंकारौचित्यम्, रसौचित्यम्, पदौचित्यम् च मुख्यरूपेण सस्वरूपेण पर्यलोचितं मया। औचित्यं काव्यस्य जीवनाधायकं तत्त्वमित्यनुसारेण रत्नावलीनाटिकायां कस्मिन् पद्ये किमचौचित्यम् परिलक्ष्यते तदैव मयाऽत्र उद्घाटितमिति। सारांशरूपेण इदमेव वक्तुं शक्यते यत् हर्षस्य रत्नावलीनाटिका औचित्यपूर्णा सारस्वतरचना वर्तते। अस्या: प्रतिपदं प्रतिवाक्यं च औचित्यभावपूर्णमिति मे विचारो दृढ:।

**Keywords:** रत्नावलीनाटिकायां, प्राहुराचार्या, संस्कृतसाहित्याकाशे, शृङ्गाररसरुचिरा.

## प्रस्तावना

संस्कृतसाहित्याकाशे नाट्यपरम्परा सहृदयानामन्त:करणे रसचर्वणाया: सौख्यामातनोति। नाट्य तु त्रिवर्गसाधनमेव। अस्मिन् नाट्यप्रकल्पे नट: स्वनाट्याभिनयप्रदर्शनेन सचेतसां हृदयं विमुह्यति। संस्कृतनाट्यमेव भारतीयपरम्पराया: मूलमिति। संस्कृतनाट्यपरम्परायां भास-अश्वघोष-कालिदासादय: बहव: नाट्यकारा: स्वरचनाकौशलेन शिल्पेन च पथप्रदर्शनं कुर्वन्ति। श्रीहर्षप्रणीतस्य रत्नावलीनाटिका प्रणयकथानुबध्दा शृङ्गाररसरुचिरा दृश्यकाव्याभिव्यक्ति: वर्तते। अस्यां नाटिकायां उदयन-सागरिकयो: प्रेमवात्सल्यानुरागात्मिकाभाविकशृङ्गाररसपरिपाकयुक्ताकथानिबध्दा जाता। अस्यां रत्नावलीनाटिकायां चत्वार: अङ्का: सन्ति। तेषु चतुर्षु अङ्केषु काव्यशास्त्रीयानि तत्त्वानि निबध्दानि सन्ति। कुत्रचित् अङ्कारसौन्दर्यम्, कुत्रचित् रसपरिपुष्टता, कुत्रचित् गुणा: कुत्रचित् छन्दासि, कुत्रचित् रीति-ध्वनि-वक्रोक्ति-औचित्यश्चेति काव्यसुषमाया: प्रकाशनं करोतीति। प्रबन्धेऽस्मिन् औचित्यमवलम्ब्यविचारप्रतिपादनमत्र मया क्रियते। सर्वप्रथमं तु औचित्यं किम् ? इत्यस्य प्रश्नस्य उत्तरं भवति यत् औचित्यं रससिध्दस्य स्थिरं काव्यस्य जीवितम्। अर्थात् औचित्यं काव्यस्य प्राणतत्त्वमिति। औचित्यस्य लक्षणमिदं क्षेमेन्द्रेण निगदितं यत्-

उचितं प्राहुराचार्या: सदृशं किल यस्य यत्।
उचितस्य च यो भाव: तदौचित्यं प्रचक्षते ॥ [1]

औचित्यं तु सम्पूर्णप्रबन्धस्य जीवितत्त्वमिति इदं औचित्यतत्त्वं सप्तविंशत्यात्मकेन भेदेन काव्यबन्धस्य चारुत्त्वं प्रतिपादयति। यथा-

---

1. औविचारचर्चा.

पदे वाक्ये प्रबन्धार्थे
गुणेऽलङ्करणे रसे।
क्रियायां कारके लिङ्गे
वचने च विशेषेण ॥
उपसर्गे निपाते च काले
देशे कुले व्रते।
तत्त्वे
सत्त्वेऽप्यभिप्रायेस्वभावे
सारसंग्रहे।
प्रतिभायामवस्थायां
विचारे नाम्न्यथाशिषि।
काव्यस्याङ्गेषु च
प्राहुरौचित्यं
व्यापिजीवितम् ॥ [2]

रत्नावलीनाटिकायां औचित्यस्य यः साक्षात्कारः जातः तस्य यथाक्रमेण अत्र मया स्थाप्यते।

**पदौचित्यम्-**

रत्नावलीनाटिकायां पदौचित्यं प्रदर्श्यते, तद्यथा-

परिम्लानं
पीनस्तनजघनसङ्गादुभ
यत

2. तदैव. ८-१०

स्तनोर्मध्यस्यान्त: परिमलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशङ्ग्या: सन्तापं वदति विसनीपत्रशयनम् ॥ [3]

रत्नावल्यां सागरिकाविरहावस्थावर्णनमिदम् अत्रोभयत इति पीनस्तनजघनाश्रयप्रदेशयोरित्यर्थम्। श्लथपदं शिथिलार्थकम्। आक्षेपो विक्षेप: समन्ताद् क्षेपणमितिभव:। वलनमाकुञ्चनम् एतदुभयं च वियोगातिशये स्वाभाविकमेव। विसनीकमलिनी। अत्राधोमुखं शयनाया नायिकाया दीर्घनि:श्वासवन्नासिकाघटिताननसम्मर्दात् कथं विसनीपत्रशयनस्य परिम्लानत्त्वमिति कविरेव प्रष्टव्य:, मौनमालम्बमानीयमौचित्याचार्याश्च विशेषेण सङ्गादित्यत्र च मर्दाद् भाराद् घर्षाद्वेति पाठ: उचित: प्रतीयते। पीनत्त्वविशिष्टवस्तुअसङ्गस्य यत: परिम्लानजनकत्त्वं न नियतम्।
अत्रेत्यारम्भ्य पुष्णातीत्यन्तेन ग्रन्थेन। अतएव पदौचित्यमेव प्रकाशितो जायते इति।

**अलङ्कारौचित्यम्**

रत्नावल्यां अलङ्कारौचित्यमपि परिप्रकासते। एतस्य अलङ्कारौचित्यस्य लक्षणमिदं भणितं अचार्यक्षेमेन्द्रेण औचित्यविचारचर्चायाम् तद्यथा-
अर्थौचित्यवता सूक्तिरङ्कारेण शोभते।
पीनस्तनस्थितेनेव हारेण हरिणेस्तथा ॥ [4]

अर्थात् प्रस्तुतार्थस्यौचित्येनोपमोत्प्रेक्षादिनालङ्कारेण सूक्तिश्च कान्त्रि कामिनीवोच्चकुचचुम्बिना रुचिरमुक्तकलापेन। श्रीहर्ष: रत्नावल्यां लक्षणमिदमवलम्ब्य अलङ्कारौचित्यं प्रकाशयति। यथा-
विश्रान्तविग्रहकथो रतिमानञ्जनस्य
चित्ते वसन् प्रियवसन्तक एव साक्षात्।
पर्युत्सुको निजमहोत्वदर्शनाय
वत्सेश्वर: कुसुमचाय इवाभ्युपैति ॥ [5]

रत्नावल्यां प्रथमाङ्के राज्ञो वत्सेश्वरस्योदयनस्य वसन्तमहोत्सवं द्रष्टुमागच्छतो यौगन्धरायणकृतं वर्णनमिदम्। अत्र विशेषेणेष्वभङ्गश्लेषानुप्राणितोपमोपि विग्रहादिपदं श्लिष्टम्। तथाचोदयनपक्षे विग्रहोयुध्दम् तस्य कथाविश्रान्ता यद्विषये स:। कामपक्षे विग्रहशरीरम्, तस्य कथेत्यादि समानम्। उदयनस्य हि प्रभावातिशयात्सर्वे राजान: तद्वशम्वदा इति न क्वापि विग्रहवार्ता। कामस्य च हरकोपाग्निदग्धशरीरत्त्वात् तथात्वम्। रतिरुदयनपक्षे सुखम् तद्वान् राजा। कामपक्षे तु रति: कामस्य पत्नीति पत्नीति प्रसिध्दमेव, तद्वान इत्यर्थ:। जनस्य चित्ते वसन् इति राज्ञो जनै: स्पृहणीयगुणत्त्वात् तद्विषये सङ्गतम्। कामस्य च मनोभवत्त्वात् तथात्वं प्रसिध्दमेव। वसन्तको राजपक्षे तन्नामको विदूषक: स प्रियो यस्य स:। कामपक्षे तु वसन्तर्तु:। स्वार्थे क: प्रत्य: निजमहोत्सवदर्शनायेति चतुर्थी क्रियार्थोपपदस्य च इत्यादि सूत्रेण। अतो दर्शनायेत्यस्य दर्शनं कर्तुमित्यर्थ:, अत्र च राजपक्षे निजशब्दस्य स्वीय: स्वै: स्वविषयकोऽर्थ:। तथा चैवंविधवसन्तमहोत्सवं द्रष्टुं पर्युत्सुक-उत्कण्ठितो वत्सेश्वर उदयन: साक्षात्देव मूर्तिमानेव कुसुमचाय: काम इवाभ्युपैति। अत एव वत्सेश्वरोदयनस्य कामदेवेन सह उअमिता उपमाध्वनि: औचित्यपूर्णा विद्यते। इयं उपमा शृङ्गाररसानुरूपहृदयावर्जका काव्यबन्धस्य चारुतामावहति इति।

**रसौचित्यम्**

रत्नावल्यां पदाऽलङ्कारानान्तरं रसौचित्यमपि दृष्टिपथे आयाति। एतदर्थं ग्रन्थकारेण आचार्यक्षेमेन्द्रेण औचित्यविचारचर्चायां रसौचित्यस्य स्वरूपं प्रतिपादितम् यत्-
कुर्वन्सर्वासये व्याप्तिमाउचित्यरुचिरो रस:।
मधुमास इवाशोकं करोत्यङ्कुरितं मन:॥

अर्थात् औचित्येन भ्राजिष्णु: शृङ्गारादिलक्षणो रस: सकलजनहृदयव्यापी वसन्त इवाशोकमङ्कुरितं मन: करोति। रसएव् काव्यबन्धस्य प्राणतत्त्वमिति। रसस्य औचित्यं रसौचित्यम्। बन्धे रसस्य उचिता वर्णना रसौचित्यं प्रकाशयतीति रत्नावल्यां श्रीहर्षेण औचित्यमिदं स्थापितम्, तद्यथा-
उद्दामोत्कलिकां विपाण्डुररुचं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मन:।
अद्योद्यानलतिमिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन्कोपविपाटलद्युतिमुखं देव्या: करिष्याम्यहम् ॥ [6]

पद्येऽस्मिन् ईर्ष्याविप्रलम्भरूपस्य शृङ्गररसस्य वासवदत्तायामवेक्ष्यमाणस्य नवमालिकालतायाललितोपवनितातुल्यतया विरहावस्थारोपेण नितरामौचित्यरुचिराचमत्कारकारिणी दीप्तिरुदिता। कथमिति दीप्तिरुदिता जाता इत्यस्मिन् प्रसङ्गे व्याख्यास्पृष्ट्यातीति सागरिकां द्रष्टुमुत्सुकस्य राज्ञस्तुल्यनवमालिकालतादर्शनेन देव्यावासवदत्ताया भावक्रोधविषयकं वचनमिदं रत्नावल्यां द्वितीयाङ्के स्थितम्। उद्दामोत्कलिकेत्यादि विशेषणानि श्लेषवशेनोभयत्रलतायां नार्या च योजनानि। उद्दामा उद्भूता उत्कलिका उत्कृष्टा: कलिका यस्यास्तामिति लतापक्षे। नारीपक्षे च उद्दामोत्कटोत्कलिकोत्कण्ठा यस्यास्तामिति। विपाण्डुररुचमिति विपाण्डुरा विशेषेण पाण्डुरा रुचिर्यस्य

3. रत्नावली-
4.औविचारचर्चा . 5
5. रत्नावली. १/८
6. रत्नावली.२/४

स्ताम्। उभयत्र समान एवार्थः। हेतुस्तुभिन्नः लतापक्षे विपाण्डुररुचित्त्वे वसन्तर्तु प्रभावो हेतुः। इदानीं पत्रशातनकालागमात् नारीपक्शे च प्रियविरहः सोपि वसन्तकालिक इति न केवलं पाण्डुराऽपि तु विपाण्डुरा विशेषेण पाण्डुरा रौचिस्तयोरिति भावः। क्षणात् क्षणादनन्तरं द्वितीयादिक्षणेषु भूयो भूय इति तात्पर्यम् प्राब्धा जृम्भाविकासो ययेति लतापक्षे। अत्र प्रारब्धेत्यादिकर्मणि क्तः पूर्णविकासस्यासन्नतया विकासक्रियाघटकव्यापाराणामादि व्यापारस्य सम्भृतत्त्वात्। नारीपक्षे तु भूयोभूयः प्रियविरहचिन्तातुरतया प्राब्धा जृम्भा मुखविकासो ययेति पदार्थः। अविरलैः श्वसनस्य वसन्तानिलस्य उद्गमैरात्मानम् आयासं कम्पनमातन्वतीं प्रकटयन्तीति लतापक्षे। नारीपक्षे तु श्वसनोद्गमा दीर्घश्वासाः प्रियविरहजन्मान् इति आयासश्च विरहव्यथेति विशेषः। वस्तुतस्तु उद्दामोत्कलिकामित्यनेनैव गतार्थमेतद् विशेषणम्। इमामुद्यानलतामन्यां नारीमिवानुरागेण परयन्नहं देव्या वासवदत्ताया मुखं परनारीदर्शनेर्ष्याप्रभावात् कोपविपाटलद्युति कोपारुण ध्रुवं निश्चयेन करिष्यमीत्युत्प्रेक्षा सम्भाव्यते।

अत्र ईर्ष्याकृतो विप्रलम्भ ईर्ष्याविप्रलम्भः परनारी तुल्यलतार्दनजन्येर्ष्यया वासवदत्ता नूनं मत्पराङ्मुखी भवेदिति हेतोरियमुक्तिः सङ्गतार्था। विरहवस्थारोपेण इदं चिन्त्यं मदीयं लता समदना मदनवृक्षाश्रिता तर्हि कथं नाम तत्र विरहावस्थारोपः संगच्छते ? अतोऽयुक्तमेतत्। वस्तुतस्तु नारीपक्षे विशेषणमिदं पुनरुक्तदोषदुष्टमिति पूर्वमुक्तमेव, उद्दामोत्कलिकाभित्यनेनैव नार्याः समदनत्त्वस्य स्पष्टं प्रतिपत्तेः। तथा च अद्योद्यानलतामिमां समदनाम अस्य स्थाने अद्योद्यानलतामिमामदनाम् इत्येव पाठ्यमिति प्रतीम्। अतएव आयासं श्वसनोद्गमैः इत्यादिविशेषेणमपि सङ्गतं भवति, पवनान्दोलिताया लतायाः स्वाश्रयीभूतमदनवियोगसम्भवात्। तथा च सति नारीपक्षेऽपि विशेषणमेतत् संघटते मदनेन् नायकेन रहितामित्यर्थबोधात्। एवं चोक्तो विरहवस्थारोपोपि सूपपादितो भवति। अतएव मनुष्यातिरिक्तस्य रत्यादे रसाभासप्रयोजकतया लतानिष्ठो विरहो न विप्रलम्भशृङ्गाररसत्त्वं भजते। तथा च तन्निष्ठौचित्यस्य कथंचिद्रसाभासौचित्यत्त्व स्वीकारेऽपि रसौचित्यत्त्वं कथमिति नावबुध्यते। विरहावस्थारोपनिष्ठत्त्वेऽप्यौचित्यस्य रसनिष्ठत्वाभावः सपष्ट एव। यदि च वासवदत्तानिष्ठविप्रलम्भशृङ्गाररसोपयोगितास्याभासस्य रसौचित्यत्त्वमुपपाद्यं तर्हि पदौचित्यादिपदार्थवर्णने का गतिः? न हि तत्र पदायौचित्यमिति विग्रहशक्यः कर्तृमुपपादयितुं वा स्वरसतः इत्यर्थः।

भयानकरसविषये कथयति यत्-

कण्टे कृत्तावशेषं कनकमयमधः श्रृंखलादाम कर्षन्  
क्रान्त्वा द्वाराणि हेलाचलचरणत्किंकणीचक्रवालः।  
दत्तातंकोगंनानामनुसृतसरणिः संभ्रमादश्वपाले;  
प्रभ्रष्टोयं प्लवंगः प्रविशति नृपतेर्मन्दिरं मन्दुरायाः॥ [7]

अपि च-

नष्टं वर्षवरैर्मनुष्यगणनाभावादकृत्वा त्रपामन्तः  
कंचुकिकंचुकस्य विशति त्रासादयं वामनः।  
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं  
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशंकिनः॥ [8]

एताभ्याम् द्वाभ्याम् पद्याभ्याम् भयानकरसस्य काचित् द्युतिरुदीपिता जाता। तात्पर्यमिदमस्ति यत् अंगाना निशितदशननखशिखोल्लेखातकंदानेन प्रचुरतरवानराभिसरणभयसम्भ्रान्तान्तः पुरिकवृद्धवामनकिरातकुब्जादीनां पुरुषगणनाविहीनतया धैर्यविरहकातराणामुचितचेष्टानुभाववर्णनया भयानकरससंवादिरुचिरौचित्यमाचकास्ति।

## पदौचित्यम्

औचित्यविचारपरम्परायां पदौचित्यस्यापि उल्लेखः वर्तते, रत्नावलीनाटिकायाम् पदौचित्यम् परिक्ष्यते। पदौचित्यस्य लक्षणमिदं भणितं आचार्यक्षेमेन्द्रेण औचित्यविचारचर्चायाम्, यथा-

तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम्।  
चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम् ॥ [9]

एकमेवोचितं पदं तिलकायमानं बिभ्राणा सूक्तिः समुचितपरभागशोभातिशयेन रुचिरतामावहति। अस्मिन् पर्याये रत्नावलिनाटिकायाः पद्यमिदं उदाहृतम्। तद्यथा-

परिम्लान पीनस्तनजघनसंगादुभयत  
स्तनोर्मध्यस्यान्तः परिमलनमप्राप्य हरितम्।  
इदम् व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः  
कृशांग्याः सन्तापं वदति बिसनीपत्रशयनम् ॥ [10]

पद्येऽस्मिन् पदौचित्यं प्रकाश्यते यथा मनोरमाकारेण पर्यालोचितम् यत् रत्नावल्यां सागरिकाविहरावस्थावर्णनमिदम्। अत्रोभयत इति पीनजघनाश्रयप्रदेशयोरित्यर्थकम्। श्लथपदं शिथिलार्थकम्। आक्षेपो विक्षेपः समन्ताद् क्षेपणमिति भावः। वलनमाकुञ्चनम्। एतदुभयं च वियोगातिशये स्वाभाविकमेव। बिसनी कमलिनी। अत्राधोमुखं शयनाया नायिकाया दीर्घनिःश्वासवन्नासिकाघटितानसम्मर्दात् कथं न विसनीपत्रशयनस्य परिम्लानत्वमिति कविरेव प्रष्टव्यः, मौनमालम्बमानोयमौचित्याचार्यश्च् विशेषेण। सङ्गादित्यत्र च मर्दाद् भाराद् घर्षाद्वेति पाठ उचितः प्रतीयते।

7. रत्नावली. २/२  
8. रत्नावली.२/३  
9. औचित्यविचारचर्चा कारिका-११  
10. रत्नावली २ /११

पीनत्वविशिष्टवस्तुसङ्गस्य यत: परिम्लानजनकत्वं न नियतम्। प्राय: औचित्यं काव्यप्रबन्धस्य जीवनाधायकं तत्त्वमिति ज्ञात्वा रत्नावलीनाटिकायां केचन् श्लोका: मया उद्घाटिता:। तेषां श्लोकानां औचित्यदृष्ट्या पर्यालोचनं यथामत्या यथाबुद्ध्या मयाऽत्र उपस्थापितम्। सारभूतमिदं वर्तते यत् काव्येषु प्रबन्धेषु नाटकेषु महाकाव्येषु औचित्यस्य प्राधान्यता परिलक्षिता जाता इत्याशय: सारांश:। इति दिक्॥

**सन्दर्भ:**


1. रत्नावलीनाटिका चौखम्भासुरभारतीप्रकाशन, वाराणसी सन्-२०१५
2. औचित्यविचारचर्चा चौखम्भा प्रकाशक वाराणसी-सन्-२००६
3. औचित्यसिद्धान्तविमर्श, भारतीय बुक कार्पोरेशन नईदिल्ली
4. काव्यशास्त्र का इतिहास, प्रयागराज प्रकाशन, इलाहाबाद
5. काव्यशास्त्रविमर्श उत्तराञ्चलसंस्कृत अकादमी, हरिद्वार